[३६३] अङ्गगात्रकण्ठेभ्य इति वक्तव्यम् । (म. भा. २. २२२)

[1]मृद्वङ्गी, मृद्वङ्गा । [2]सुगात्री, सुगात्रा । स्निग्धकण्ठी, स्निग्धकण्ठा ।

अद्रवं मूर्तिमत् स्वाङ्गं प्राणिस्थमविकारजम् ।

अतत्स्थं तत्र दृष्टं चेत् तेन चेत्तत्तथायुतम् ॥ (म. भा. २. २२२)

## नासिकोदरौष्ठजङ्घादन्तकर्णशृङ्गाच्च । (५५/५११)

स्वाङ्गाच्चोपसर्जनात् इत्येव । बह्वच्‌लक्षणे संयोगोपधलक्षणे च प्रतिषेधे प्राप्ते वचनम् । सहनञ्विद्यमानलक्षणस्तु प्रतिषेधो भवत्येव। नासिकाद्यन्तात् प्रातिपदिकात् स्त्रियां [3]वा ङीष् प्रत्ययो भवति । तुङ्गनासिकी, तुङ्गनासिका । [4]तिलोदरी, तिलोदरा । बिम्बोष्ठी, बिम्बोष्ठा । दीर्घजङ्घी, दीर्घजङ्घा । समदन्ती, समदन्ता । चारुकर्णी, चारुकर्णा । तीक्ष्णशृङ्गी, तीक्ष्णशृङ्गा ।

[३६४] पुच्छाच्चेति वक्तव्यम् ।

कल्याणपुच्छी, कल्याणपुच्छा ।

[४६५] कबरमणिविषशरेभ्यो नित्यम् । (म. भा. २.२२४)

कबरपुच्छी । मणिपुच्छी । विषपुच्छी । शरपुच्छी ।

[३६६] उपमानात् पक्षाच्च [5]पुच्छात् च । (म. भा. २. २२४)

उलूकपक्षी[6]सेना । उलूकपुच्छी [7]शाला ॥

## न क्रोडादिबह्वचः । (५६/५१२)

स्वाङ्गात् इति ङीष् प्राप्तः प्रतिषिध्यते । क्रोडाद्यन्तात् बह्वजन्तात् प्रातिपदिकात् स्त्रियां ङीष् प्रत्ययो न भवति । कल्याणक्रोडा । [8]कल्याणखुरा । कल्याणोखा । कल्याणबाला । कल्याणशफा । [9]कल्याणगुदा । कल्याणघोणा । कल्याणनखा । [10]कल्याणमुखा । क्रोडादिराकृतिगणः । [11]सुभगा । सुगला । बह्वचः खल्वपि – पृथुजघना । महाललाटा ॥

## सहनञ्विद्यमानपूर्वाच्च । (५७/५१३)

स्वाङ्गाच्चोपसर्जनात् (४.१.५४/५१०) इति[12], 'नासिकोदरौष्ठजङ्घादन्तकर्णशृङ्गाच्च' (४.१.५५/५११) इति च प्राप्तो ङीष् प्रतिषिध्यते । सह नञ् विद्यमान [13]एवंपूर्वात् प्रातिपदिकात् स्त्रियां ङीष् प्रत्ययो न भवति । सकेशा । अकेशा । विद्यमानकेशा । सनासिका । अनासिका । विद्यमाननासिका[14] ॥

---

उदाहरणमिदं नास्ति ब. 2. मृदुगात्री ड. ह. 3. वा नास्ति फ. 4. तलोदरी, तलोदरा ब. फ. ड. 5. पुच्छाच्च नास्ति फ. 6. शाला फ. 7. सेना क. फ. 8. कल्याणगुल्फा ब. क. ड. इ, कल्याणशिखा ड, कल्याणवाचा ह. 9. कल्याणगुहा ड, कल्याणभुजा ह. 10. नास्ति क. 11. दुर्भगा इ. क. ह. 12. प्राप्तः इत्यधिकम् क. फ. 13. इत्येवंपूर्वात् ब. 14. गोस्त्रियोपसर्जनस्य इति स्त्रीत्वे कृते इति टाप् इत्यधिकम् फ.